# Shri Sharadadevi Stotram

# શ્રીશારદાદેવીસ્તોત્રમ્

## Document Information

Text title : Shri Sharadadevi Stotram

File name : shAradAdevIstotram1.itx

Category : deities_misc, gurudev, rAmakRiShNa, stotra

Location : doc_deities_misc

Author : Swami Abhedananda

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

Shri Sharadadevi Stotram

# શ્રીશારદાદેવીસ્તોત્રમ્

(અથ શ્રીમત્યાઃ શારદાદેવ્યાઃ સ્તોત્રં પ્રારભ્યતે)

પ્રકૃતિં પરમામભયાં વરદાં
    નરરૂપધરાં જનતાપહરામ્ ।
શરણાગત સેવકતોષકરીં
    પ્રણમામિ પરાં જનનીં જગતામ્ ॥ ૧॥

ગુણહીનસુતાનપરાધયુતાન્
    કૃપયાऽદ્ય સમુદ્ધર મોહગતાન્ ।
તરણીં ભવસાગરપારકરીં
    પ્રણમામિ પરાં જનનીં જગતામ્ ॥ ૨॥

વિષયં કુસુમં પરિહૃત્ય સદા
    ચરણામ્બુરુહામૃત શાન્તિસુધામ્ ।
પિબ ભૃઙ્ગમનો ભવરોગહરાં
    પ્રણમામિ પરાં જનનીં જગતામ્ ॥ ૩॥

કૃપાં કુરુ મહાદેવિ સુતેષુ પ્રણતેષુ ચ ।
ચરણાશ્રય દાનેન કૃપામયિ નમોऽસ્તુતે ॥ ૪॥

લજ્જાપટાવૃતે નિત્યં શારદે જ્ઞાનદાયિકે ।
પાપેભ્યો નઃ સદા રક્ષ કૃપામયિ નમોऽસ્તુતે ॥ ૫॥

રામકૃષ્ણગત પ્રાણાં તન્નામશ્રવણપ્રિયામ્ ।
તદ્ભાવરઞ્જિતાકારાં પ્રણમામિ મુહુર્મુહુઃ ॥ ૬॥

પવિત્રં ચરિતં યસ્યાઃ પવિત્રં જીવનં તથા
પવિત્રતા સ્વરૂપિણ્યૈ તસ્યૈ કુર્મો નમો નમઃ ॥ ૭॥

દેવીં પ્રસન્નાં પ્રણતાર્તિહન્ત્રીં, યોગીન્દ્રપૂજ્યાં યુગધર્મપાત્રીમ્ ।
તાં શારદાં ભક્તિવિજ્ઞાનદાત્રીં, દયાસ્વરૂપાં પ્રણમામિ નિત્યમ્ ॥ ૮॥

સ્નેહેન બધ્નાસિ મનોઽસ્મદીયં, દોષાનશેષાન્ સગુણી કરોષિ ।
અહેતુના નો દયસે સદોષાન્, સ્વાઙ્કે ગૃહીત્વા યદિદં વિચિત્રમ્ ॥ ૯॥

પ્રસીદ માતર્વિનયેન યાચે, નિત્યં ભવ સ્નેહવતી સુતેષુ ।
પ્રેમૈકબિન્દું ચિરદગ્ધચિત્તે, વિષિઞ્ચ ચિત્તં કુરુ નઃ સુશાન્તમ્ ॥ ૧૦॥

જનનીં શારદાં દેવીં રામકૃષ્ણં જગદ્ગુરુમ્ ।
પાદપદ્મે તયોઃ શ્રિત્વા પ્રણમામિ મુહુર્મુહુઃ ॥ ૧૧॥

ઇતિ શ્રીમત્ અભેદાનન્દસ્વામિનાવિરચિતં
"શ્રીમત્યાઃ શારદાદેવ્યાઃ સ્તોત્રમ્" સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

*Shri Sharadadevi Stotram*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*